विशेषः। सा हिन्दोलरागस्य पत्नी। अस्या ध्यानं यथा,—

“प्रदोषकाले गृहसम्प्रविष्टा
प्रदीपहस्ताऽरुणगात्रवस्त्रा।
सीमन्तसिन्दूरविराजमाना
सुरक्तमाल्या किल दीपिकेयम्॥”

तस्या गानकालः सायाह्नः। इति सङ्गीतदामोदरः॥ ( प्रदीपः। यथा, रघुः।६।७०।

“स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम्॥”)

प्रकाशिकायाम्, त्रि॥

दीपिता, [ऋ] त्रि, (दीपयतीति। दीप+णिच्+तृच्।) दीप्तिकर्त्ता। इति व्याकरणम्॥

दीप्तं, क्ली, ( दीपी दीप्तौ+क्तः। “श्वीदितो निष्ठायाम्।” ७।२।१४। इति नेट्।) स्वर्णम्। हिङ्गु। इति राजनिर्घण्टः॥ (स्वर्णशब्दे हिङ्गुशब्दे च विवृतिरस्य ज्ञेया॥)

दीप्तः, पुं, ( दीप+क्तः।) निम्बुकः। सिंहः। इति राजनिर्घण्टः॥ ( नासागतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे २२ अध्याये।

“घ्राणे भृशं दाहसमन्विते तु
विनिःसरेद्धूम इवेह वायुः।
नासा प्रदीप्तेव च यस्य जन्तो-
र्व्याधिस्तु तं दीप्तमुदाहरन्ति॥”

अस्य प्रतिषेधमाह तत्रैव २३ अध्याये।

“दीप्ते रोगे पैत्तिकं संविधानं
कुर्य्यात् सर्व्वं स्वादु यच्छीतलञ्च॥”)

दीप्तः, त्रि, ( दीप+क्तः।) निर्भासितः। दग्धः। ज्वलितः। इति मेदिनी। ते, २५॥ ( यथा, हरिवंशे। १६८।३।

“ततः शकुनयो दीप्ता मृगाश्च क्रूरभाषिणः।
दीप्तायां दिशि भाषन्तो भयमावेदयन्ति मे॥”)

दीप्तकं, क्ली, ( दीप्तमेव। स्वार्थे कन्।) स्वर्णम्। इति राजनिर्घण्टः॥

दीप्तजिह्वा, स्त्री पुं, ( दीप्ता जिह्वा यस्याः।) उल्कामुखी शृगाली। इति हारावली।७६॥ ( प्रदीप्तजिह्वे, त्रि। यथा, महाभारते। १। २२६। ३७।

“दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः॥”)

दीप्तपिङ्गलः, पुं, ( दीप्तः पिङ्गलश्च। दीप्तं स्वर्णं तद्वत् पिङ्गलो वा।) सिंहः। इति राजनिर्घण्टः॥

दीप्तरसः, पुं, ( दीप्त उज्ज्वलो रसो यस्य।) किञ्चुलुकः। इति शब्दचन्द्रिका॥

दीप्तलोचनः, पुं, ( दीप्ते लोचने नेत्रे यस्य।) विड़ालः। इति राजनिर्घण्टः॥

दीप्तलोहं, क्ली, ( दीप्तं लोहमिव।) कांस्यम्। इति राजनिर्घण्टः॥

दीप्ता, स्त्री, ( दीप्त+टाप्।) लाङ्गलिकावृक्षः। इति रत्नमाला॥ ज्योतिष्मती। सातला। इति राजनिर्घण्टः॥

दीप्ताक्षः, पुं, ( दीप्ते अक्षिणी यस्य।) विड़ालः। इति शब्दरत्नावली॥ ( प्रदीप्तनेत्रे, त्रि। यथा, महाभारते। १। २२६। ३७।

“दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः॥”)

दीप्ताग्निः, पुं, ( दीप्तः अग्निर्जठराग्निर्यस्य।) अगस्त्यः। इति त्रिकाण्डशेषः॥ (प्रदीप्तो वह्निः। यथा, भट्टिः। २। २।

“सधूमदीप्ताग्निरुचीनि रेणु-
स्तान्तोत्पलान्याकुलषट्पदानि॥”)

तीक्ष्णजठरानलयुक्ते, त्रि॥ ( यथा, सुश्रुते। १। २०।

“साम्प्रतोऽल्पतया वापि दीप्ताग्नेस्तरुणस्य च॥”)

दीप्ताङ्गः, पुं, ( दीप्तं भासितमङ्गमस्य।) मयूरः। इति शब्दरत्नावली॥

दीप्तिः, स्त्री, ( दीप+क्तिन्।) दीपनम्। तत्पर्य्यायः। प्रभा २ रुक् ३ रुचिः ४ त्विट् ५ भा ६ भाः ७ छविः ८ द्युतिः ९ रोचिः १० शोचिः ११। इत्यमरः।१।४।३४॥ वाणवेगस्य तीव्रता। स्त्रिया अयत्नजगुणः। इति हेमचन्द्रः।२।१३॥

“कान्तिरेव वयोभोगदेशकालगुणादिभिः।
उद्दीपितातिविस्तारं प्राप्ता चेद्दीप्तिरुच्यते॥”
इत्युज्ज्वलनीलमणिः॥

( यथा, साहित्यदर्पणे। ३। १३१।

“कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते॥”)

लाक्षा। कांस्यम्। इति राजनिर्घण्टः॥

दीप्तिकः, पुं, ( दीप्त्या कायतीति। कै+कः।) दुग्धपाषाणवृक्षः। इति राजनिर्घण्टः॥

दीप्तोपलः, पुं, (दीप्तः सूर्य्यकिरणसम्पर्कात् ज्वलितः उपलः।) सूर्य्यकान्तमणिः। इति राजनिर्घण्टः॥

दीप्यः, पुं, ( दीपाय अग्निदीपनाय हितमिति। दीप+“तस्मै हितम्।” ५।१।४। इति अपूपादित्वात् पक्षे यत्।) यमानी। ( अस्य पर्य्यायो यथा,—

“यमानी दीप्यको दीप्यो भूतिकश्च यमानिका॥”
इति वैद्यकरत्नमालायाम्॥)

जीरकः। इति राजनिर्घण्टः॥ (दीपाय साधुरिति। दीप+“तत्र साधुः।” ४।४।९८। इति यत्।) मयूरशिखा। रुद्रजटा इति ख्याता। इत्यमरः। २। ४। १११॥

दीप्यकं, क्ली, ( दीपाय हितं साधुरिति वा। दीप+यत्। ततः स्वार्थे कन्।) अजमोदा। यमानी। (यथा भावप्रकाशे क्षुद्ररोगाधिकारे।

“सैन्धवं चन्दनं कुष्ठं दीपकञ्च फलं पृथक्॥”)

बर्हिचूड़ा। इति मेदिनी। के, १०५॥

दीप्यकः, पुं, ( दीप्य+संज्ञायां स्वार्थे वा कन्।) अलङ्कारः। यमानी। (अस्य पर्य्याया यथा,—

“यमानी दीप्यको दीप्यो भूतिकश्च यमानिका॥”
इति वैद्यकरत्नमालायाम्॥)

लोचमस्तकः। इति भरतधृतरभसः॥ (अजमोदा। तत्पर्य्यायो यथा,—

“अजमोदा खराश्वा च मायूरो दीप्यकस्तथा।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे॥)

दीप्रः, त्रि, ( दीप्यते इति। दीप+“नमिकम्पिस्म्यजसकमहिंसदीपो रः।” ३।२।१६७। इति रः।) दीप्तिविशिष्टः। इति व्याकरणम्॥ ( यथा कथासरित्सागरे। २५। १३५।

“क्वचित् क्वचिच्चिताज्योतिर्दीप्रदीपप्रकाशितम्॥”)

दीयमानः, त्रि, ( दीयते इति। दा+कर्म्मणि शानच्।) वर्त्तमानदानसम्बन्धिवस्तु। इति व्याकरणम्। यथा, कल्पचिन्तामणौ।

“विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके।
पूर्व्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति॥”
इति तिथ्यादितत्त्वम्।

दीर्घं, त्रि, ( दृणातीति। दॄ विदारणे+बाहुलकात् घञ्।) आयतम्। इत्यमरः। ३।१।६६। ( यथा मेघदूते। १०३।

“दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः॥”)

दीर्घः, पुं, ( दॄ+बाहुलकात् घञ्।) लताशालवृक्षः। ( यथा, वैद्यकरत्नमालायाम्।

“ताक्ष्योऽश्वकर्णः कुशिको बल्यो दीर्घो लताद्रुमः॥”)

इत्कटः। इति रत्नमाला॥ रामशरः। उष्ट्रः। इति राजनिर्घण्टः॥ पञ्चमषष्ठसप्तमाष्टमराशयः। यथा। वृश्चिककन्याऽङ्गपतिर्वणिजो दीर्घाः। इति ज्योतिषतत्त्वम्॥ द्विमात्रवर्णः। तद्यथा। आ ई ऊ ॠ ए ऐ ओ औ। गुरुवर्णः। इति व्याकरणम्॥ (दीर्घलक्षणं यथा,—

“एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥”)

दीर्घकणा, स्त्री, (दीर्घा कणेति नित्यकर्म्मधारयः।) गौरजीरकः॥ इति राजनिर्घण्टः॥

दीर्घकण्टकः, पुं, ( दीर्घः कण्टकोऽस्य।) वर्व्वुरः। इति राजनिर्घण्टः॥

दीर्घकण्ठकः, पुं, ( दीर्घः कण्ठोऽस्य। कप्।) वकपक्षी। इति शब्दचन्द्रिका॥

दीर्घकन्दकं, क्ली, ( दीर्घः कन्दो यस्य। कप्।) मूलकम्। इति राजनिर्घण्टः॥ (मूलकशब्देऽस्य गुणादयो विज्ञेयाः॥)

दीर्घकन्दिका, स्त्री, ( दीर्घकन्दक+टाप् अत इत्वञ्च।) मुषली। इति राजनिर्घण्टः॥

दीर्घकन्धरः, पुं, ( दीर्घः कन्धरो यस्य।) वकः। इति राजनिर्घण्टः॥

दीर्घकाण्डः, पुं, (दीर्घः काण्डो यस्य।) गुण्डतृणम्। इति राजनिर्घण्टः॥

दीर्घकाण्डा, स्त्री, (दीर्घः काण्डोऽस्याः।) पातालगरुड़ीलता। इति राजनिर्घण्टः॥

दीर्घकीलः, पुं, ( दीर्घः कीलः शाखादण्डो यत्र।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥

दीर्घकीलकः, पुं, (दीर्घकील+स्वार्थे कन्।)अङ्कोठवृक्षः। इति जटाधरः॥

दीर्घकूरकं क्ली, (दीर्घं कूरकमन्नम्।) राजान्नम्। इति राजनिर्घण्टः॥